## ग

गकारः व्यञ्जनवर्णभेदः तस्योच्चारणस्थानं जिह्वामूलरूपकण्ठदेशः, आभ्यन्तरप्रयत्नः जिह्वामूलस्पर्शः, बाह्यप्रयत्नाः संवारनादघोषाः अल्पप्राणश्च। मातृकान्यासेऽस्य दक्षिणमणिबन्धे न्यासः। अस्य ध्येयरूपदेवतादिकं कामधेनुतन्त्रे उक्तं यथा“गकारं परमेशानि! पञ्चदेवात्मकं सदा। निर्गुणं त्रिगुणातीतं निरीहं निर्मलं सदा। पञ्चप्राणमयं वर्णं सर्वशक्त्यात्मकं प्रिये!। अरुणादित्यसङ्काशं कुण्डलीं प्रणमाम्यहम्”। हृदयस्थद्वादशदलकमलस्य कादिठान्तद्वादशवर्णयुततया अस्य तन्मध्यगत्वम्। अस्य वाचकशब्दा वर्णाभिधाने उक्ता यथा“गो गौरी गौरवं गङ्गा गणेशो गोकुलेश्वरः। शार्ङ्गी पञ्चात्मको गाथा गन्धर्वः सर्वगः स्मृतिः। सर्वसिद्धिः प्रभा धूम्रा द्विजाख्यः शिवदर्शनः। विश्वात्मा गौः पृथग्रूपा मणिबन्धस्त्रिलोचनः। गीतं सरस्वती विद्या भोगिनी नकुलोधरा। तेजस्वती च हृदयं स्थानं जालन्धरो लयः”। काव्यादिरचनायामस्यासंयुक्ततया प्रथमविन्यासे लक्ष्मीः फलम्। “कः खोगोघश्च लक्ष्मीम्” संयुक्तं चेह न स्यात् सुखभरणपदर्वर्गविन्यासयोगः। पद्यादौ गद्यवक्त्रे वचसि च सकले प्राकृतादौ समोऽयमिति” वृ०र०टी० सविशेषतयोक्तेः।

**ग** न० गै—क। १गीते २गणेशे ३गन्धर्वे पु०एकाक्षरको० ४गुरुवर्णे “म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः” वृत्तर०। “गुरुरेको गकारस्तु लकारो लघुरेककः” छन्दोम०। “यरामन्तगलौ सतौ”“गौ स्त्री”वृत्तर०।“सुप्युपपदे गमेर्ड। हृद्ग हृदयगामिनि कण्ठग कण्ठगामिनि इत्याद्यर्थे त्रि०“हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः” मनुः। सुप्युपपदे गै—क। सामग सामगातरि छन्दोग छन्दोगातरि त्रि०।

**गकार** पु०ग+स्वरूपे कार। गस्वरूपे वर्णे “गुरुरेको गकारस्तु लकारो लघुरेककः” छन्दो०।

**गगन** न० गम—युच् गोऽन्तादेशः। णत्वं प्रामादिकम् “फाल्गुने गगने फेने णत्वमिच्छन्ति वर्वराः” इत्युक्तेः। १आकाशे २शून्याङ्के। ३लग्नापेक्षया दशमराशौ तस्य उदितराश्यपेक्षया खस्वस्तिकस्थितत्वात् तथात्वं तथा हि पूर्वस्यामेव राशीनामुदयेन ततः सप्तमराश्युदये तस्य अस्तम् दशमराशिस्तु तदा खस्वस्तिकस्थितः इति तस्य मूर्द्धस्थाकाशस्थितत्वात् तथात्वम्। तद्गुणादेः आकाशशब्दे ५८२ पृ० विवृतिः। सुश्रुते देहस्य पाञ्चभौतिकत्वाङ्गीकारेण “आन्तरीक्षास्तु शब्दः शब्देन्द्रियं सर्वच्छिद्रसमूहो विविक्तता चेति”देहस्याकाशधर्मा उक्ताः “पृथिव्यप्तेजो वाय्वाकाशानां समुदायात् द्रव्याभिनिर्वृत्तिः”इत्युपक्रम्य द्रव्यगता गगनजधर्मास्तत्रोक्ता यथा “श्लक्ष्णसूक्ष्ममृदुव्यवायिविविक्तमव्यक्तरसं शब्दबहुलमाकाशीयम् तन्मार्द्दवशौषिर्य्यलाघवकरम्”। तथाकाशगुणभूमिष्ठं संशमनम्”इत्युपक्रम्य भूतविशेषसाचिव्येन धातुविशेषसंशमनकारित्वं तस्य दर्शितं सुश्रुतेन यथा “खतेजोऽनिलजैः श्लेष्मा शममेति शरीरिणाम्। वियत्पवनजाताभ्यां वृद्धिमाप्नोति मारुतः” “तस्याकाशगुणभूयिष्ठं मृदुत्वम्” इति च। तस्य धर्मविशेषाः भा० शा० उक्ता यथा “आकाशस्य गुणः शब्दो व्यापित्वम् छिद्रमेव च। अनाश्रयमनालम्बमव्यक्तमविकारिता। अप्रतीघातिता चैव भूतत्वं विकृतानि च”। “गगनं गणाधिपतिमूर्त्तिरिति” माघः। “अवोचदेनं गगनस्पृशा (स्वरेण) रघुः। “प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्यदृष्टीः” मेघ०।

**गगनगति** पु० गगने गतिर्यस्य। १देवे २सूर्य्यादिग्रहे ३आकाशगामिनि त्रि०। ७त०। ४आकाशे गतौ स्त्री।

**गगनचर** त्रि० गगने चरति चर—ट्च्। आकाशगामिनि देवसूर्य्यादिग्रहविहगादौ। तत्र विहगे “निसूदयन् बहुविधमत्स्यजीविनो बुभुक्षितो गगनचरेश्वरः (गरुड़ः) तदा” भा० आ० २८ अ०। [ हेमच०

**गगनध्वज** पु० गगनस्य ध्वज इव। १मेघे, हारा० २सूर्य्ये

**गगनप्रिय** पु० दैत्यभेदे। “प्रह्लादोऽश्वशिराः कुम्भः संह्लादो गगनप्रियः” हरि० ४२ अ०।

**गगनमूर्द्धन्** पु० दानवभेदे। “तथा गगनमूर्द्धा च वेगवान् केतुमांश्च यः” भा० आ० ६५अ०। दनुवंशकथने।“तथा गगनमूर्द्धा च कुम्भनाभो महासुरः” हरि० ३अ०।

**गगनसद्** त्रि० गगने सीदति गच्छति सद—क्विप्। गगनगामिनि देवग्रहविहगादौ। “बालत्वं इद्धता वा यदि गगनसदां जन्मकाले नराणाम् प्रज्ञामान्द्यम्” जातकालङ्कारः। “विश्रान्तान् गगनसदः करोत्यमुष्मिन्” माघः। गगनविहारिन्प्रभृतयोऽप्यत्र स्त्रियां ङीप्।

**गगनसिन्धु** स्त्री ६त०। मन्दाकिन्याम् “गगनसिन्धुफेनपटलजालान्तरस्य” काद०। गगननद्यादयोऽप्यत्र।